# श्री राम रक्षा स्तोत्रम्

ॐ अस्य श्री रामरक्षा स्तोत्रमंत्रस्य
बुधकौशिक ऋषिः
श्री सीताराम चंद्रोदेवता
अनुष्टुप् छंदः
सीता शक्तिः
श्रीमद् हनुमान् कीलकम्
श्रीरामचंद्र प्रीत्यर्थे रामरक्षा स्तोत्रजपे विनियोगः ॥

## ध्यानम्

ध्यायेदाजानुबाहुं धृतशर धनुषं बद्ध पद्मासनस्थं
पीतं वासोवसानं नवकमल दलस्पर्थि नेत्रं प्रसन्नम् ।
वामांकारूढ सीतामुख कमलमिलल्लोचनं नीरदाभं
नानालंकार दीप्तं दधतमुरु जटामंडलं रामचंद्रम् ॥

## स्तोत्रम्

चरितं रघुनाथस्य शतकोटि प्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातक नाशनम् ॥ 1 ॥

ध्यात्वा नीलोत्पल श्यामं रामं राजीवलोचनम् ।
जानकी लक्ष्मणोपेतं जटामुकुट मंडितम् ॥ 2 ॥

सासितूण धनुर्बाण पाणिं नक्तं चरांतकम् ।
स्वलीलया जगत्रातु माविर्भूतमजं विभुम् ॥ 3 ॥

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघवः पातु फालं (भालं) दशरथात्मजः ॥ 4 ॥

कौसल्येयो दृशौपातु विश्वामित्रप्रियः शृती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ 5 ॥

जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः ।
स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ 6 ॥

करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः ॥ 7 ॥

सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्-प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुल विनाशकृत् ॥ 8 ॥

जानुनी सेतुकृत्-पातु जंघे दशमुखांतकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥ 9 ॥

एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ 10 ॥

पाताल-भूतल-व्योम-चारिण-श्चद्म-चारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥11 ॥

रामेति रामभद्रेति रामचंद्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति ॥12 ॥

जगज्जैत्रैक मंत्रेण रामनाम्नाभि रक्षितम् ।
यः कंठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥13 ॥

वज्रपंजर नामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ॥14 ॥

आदिष्टवान्-यथा स्वप्ने रामरक्षामिमां हरः ।
तथा लिखितवान्-प्रातः प्रबुद्धौ बुधकौशिकः ॥15 ॥

आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिराम-स्त्रिलोकानां रामः श्रीमान् स नः प्रभुः ॥16 ॥

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ।
पुंडरीक विशालाक्षौ चीरकृष्णाजिनांबरौ ॥17 ॥

फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥18 ॥

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षःकुल निहंतारौ त्रायेतां नो रघूत्तमौ ॥19 ॥

आत्त सज्य धनुषा विषुस्पृशा वक्षयाशुग निषंग संगिनौ ।
रक्षणाय मम रामलक्षणावग्रतः पथि सदैव गच्छताम् ॥20 ॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन् मनोरथान्नश्च (मनोरथोऽस्माकं) रामः पातु स लक्ष्मणः ॥21 ॥

रामो दाशरथि श्शूरो लक्ष्मणानुचरो बली ।
काकुत्सः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥22 ॥

वेदांतवेद्यो यज्ञेशः पुराण पुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेय पराक्रमः ॥23 ॥

इत्येतानि जपेन्नित्यं मद्भक्तः श्रद्धयान्वितः ।
अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः ॥24 ॥

रामं दूर्वादल श्यामं पद्माक्षं पीतवाससम् ।
स्तुवंति नाभि-र्दिव्यै-र्नते संसारिणो नराः ॥25 ॥

रामं लक्ष्मण पूर्वजं रघुवरं सीतापतिं सुंदरम्
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेंद्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिम्
वंदे लोकाभिरामं रघुकुल तिलकं राघवं रावणारिम् ॥ 26 ॥

रामाय रामभद्राय रामचंद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ 27 ॥

श्रीराम राम रघुनंदन राम राम श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम श्रीराम राम शरणं भव राम राम ॥ 28 ॥

श्रीराम चंद्र चरणौ मनसा स्मरामि श्रीराम चंद्र चरणौ वचसा गृह्णामि ।
श्रीराम चंद्र चरणौ शिरसा नमामि श्रीराम चंद्र चरणौ शरणं प्रपद्ये ॥ 29 ॥

माता रामो मत्-पिता रामचंद्रः स्वामी रामो मत्-सखा रामचंद्रः ।
सर्वस्वं मे रामचंद्रो दयालुः नान्यं जाने नैव जाने न जाने ॥ 30 ॥

दक्षिणे लक्ष्मणो यस्य वामे च (तु) जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वंदे रघुनंदनम् ॥ 31 ॥

लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरूपं करुणाकरं तं श्रीरामचंद्रं शरण्यं प्रपद्ये ॥ 32 ॥

मनोजवं मारुत तुल्य वेगं जितेंद्रियं बुद्धिमतां वरिष्टम् ।
वातात्मजं वानरयूथ मुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥ 33 ॥

कूजंतं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्यकविता शाखां वंदे वाल्मीकि कोकिलम् ॥ 34 ॥

आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहम् ॥ 35 ॥

भर्जनं भवबीजानामर्जनं सुखसंपदाम् ।
तर्जनं यमदूतानां राम रामेति गर्जनम् ॥ 36 ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ 37 ॥

श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं राम नाम वरानने ॥ 38 ॥

इति श्रीबुधकौशिकमुनि विरचितं श्रीराम रक्षास्तोत्रं संपूर्णम् ।

श्रीराम जयराम जयजयराम ।